लक्ष्मीं पूजयित्वा ततः क्रमात् । दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च” तत्रैवाभ्यङ्गमभिधाय “एवं प्रभातसमये त्वमावास्यां नराधिप ! । कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः । दीपान् दत्त्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि । स्वलङ्कृतेन भोक्तव्यं सितवस्त्रोपशोभिना” । अयं प्रदोषव्यापी ग्राह्यः “तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनम्” इति ज्योतिषोक्तेः “दिनद्वये तस्य सत्त्वे परः “दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका” इति तिथितत्त्वे ज्योतिर्वचनात् । दिवोदासीये तु प्रदोषस्य कर्मकालत्वात् “अर्द्धरात्रे भवत्येव लक्ष्मीराश्रयितुं गृहान् । अतः स्वलङ्कृता लिप्ता दीपैर्जागरज्जनोत्सवाः । सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः” इति ब्राह्मोक्तेश्च । प्रदोषार्द्धरात्रव्यापिनी मुख्या, एकैकव्याप्तौ परैव । प्रदोषस्य मुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्च । यत्तु “अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः । प्रदोषसमये राजन् ! कर्त्तव्या दीपमालिका” इति क्रमः स सम्पूर्णतिथावेव प्राप्तेरनुवादो न विधिः । तत्तत्कर्मकालव्याप्तेर्बलवत्त्वात् सम्पूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्चेत्युक्तम् । अत्रैव दर्शेऽपररात्रेऽलक्ष्मीनिःसारणमुक्तं मदनरत्ने भविष्ये “एवं गते निशीथे तु जने निद्रार्द्धलोचने । तावन्नगरनारीभिः सूर्पडिण्डिमवादनैः । निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात्” । दीपावली (देओयाली) इति ख्याता तत्रार्थे

**दीपीय** त्रि० दीप+अपूपा० हितार्थे पक्षे छ । दीपहिते पक्षे यत् । दीप्य तत्रार्थे त्रि० ।

**दीपोत्सव** पु० दीपैरुत्सवः । १दीपहेतुके उत्सवे उपचारात् २दीपान्वितामावस्यायाञ्च भविष्यपु० ।

**दीप्त** त्रि० दीप–क्त । १प्रकाशान्विते २समुज्ज्वलिते च मेदि० । “समिद्धशरणा दीप्ता देहे लङ्का मतेश्वरा” भट्टिः । ३स्वर्णे ४हिङ्गुनि च न०राजनि० । ५निम्बूके पु० ६सिंहे पुंस्त्री० राजनि० स्त्रियां जातित्वात् ङीष् । ७ज्योतिष्मत्यां (शातला) स्त्री रत्नमाला ८लाङ्गलिद्रव्ये स्त्री टाप् । “शुण्ठी पार्द्धमिता कणाणवमिता दीप्तायमान्योः क्रमात्” वैद्यकम् । १०नासारोगभेदे पु० “नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तमुदाहरन्ति” सुश्रुतः नासारोगभेदोक्तौ । “दीप्ते रोगे पैत्तिकं संविधानं कुर्यात् सर्वं स्वादु यच्चापि शीतलञ्च” सुश्रुतः स्वार्थे क । दीप्तक स्वर्णे न० राजनि० ।

**दीप्तकीर्त्ति** त्रि० दीप्ता कीर्त्तिर्यस्य । १प्रकाशमानयशस्के २कार्त्तिकेये पु० । “आग्नेयश्चैव स्कन्दश्च दीप्तकीर्त्तिरनामयः” भा०व० २३१अ० कार्त्तिकनामोक्तौ । कर्म० । ३दीप्ते यशसि स्त्री ।

**दीप्तकेतु** पु० १नृपभेदे । “धृष्टकेतुर्हतकेतुर्दीप्तकेतुर्निरामयः” भा०आ० १अ० नानानृपोक्तौ । २दक्षसावर्णिमनुपुत्रभेदे । “नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः । धृष्टकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप !” । भाग०८।१३।१९ २दीप्तः केतुरस्य । ३दीप्तध्वजके त्रि० कर्म० । ४दीप्ते ध्वजे पुं न०

**दीप्तजिह्वा** स्त्री दीप्ता जिह्वा अस्याः । उल्कामुख्यां शृगाल्यां हारा०तस्या रात्रौ जिह्वातोऽग्नेः स्वतः स्फुरणात्तथात्वम् ।

**दीप्तपिङ्गल** पुंस्त्री दीप्तं स्वर्णमिव पिङ्गलः जटायाम् । स्वर्णपिङ्गलजटायुक्तत्वात् सिंहे राजनि०स्त्रियां जातित्वात् ङीष् ।

**दीप्तमूर्त्ति** त्रि० दीप्ता मूर्त्तिरस्य । १प्रकाशान्वितमूर्त्तिके २विष्णौ पु० । “विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्” विष्णुस० “ज्ञानमयी स्वेच्छया वा तैजसी मूर्त्तिरस्येति” भा० । [रात्रौ स्वयं ज्वलनात्तस्य तथात्वम् ।

**दीप्तरस** पु० दीप्तो रसोऽस्य । किञ्चुलके शब्दच० तद्रसस्य

**दीप्तरोमन्** पु० विश्वदेवभेदे । “जितात्मा मुनिवर्यश्च दीप्तरोमा भयङ्करः” भा० अनु० ९१अ० विश्वदेवोक्तौ ।

**दीप्तलोचन** पुंस्त्री०दीप्तं लोचनं यस्य । विड़ाले राजनि० । स्त्रियां जातित्वात् ङीष् । [२ज्वलिते ३लोहे च ।

**दीप्तलोह** न० नित्यकर्म० । १कांस्ये राजनि० कर्म० ।

**दीप्तवर्ण** त्रि० दीप्तं स्वर्णमिव वर्णोऽस्य । १स्वर्णतुल्यवर्णके २कार्त्तिकेये पु० “शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः” भा०व० २३१अ० कार्त्तिकनामोक्तौ ।

**दीप्तशक्ति** त्रि० दीप्ता शक्तिरस्य । १प्रकाशमानसामर्थ्ये दीप्ता शक्तिरस्त्रविशेषोऽस्य । २कार्त्तिकेये पु० । “दीप्तशक्तिः प्रशान्तात्मा भद्रकृत् कूटमोहनः” भा०व० २३१अ० स्कन्दनामोक्तौ ।

**दीप्तांशक** पु० कर्म० । ताजकोक्ते सूर्यादेरंशभेदे । “तिथ्यकाष्टनगाङ्कशैलखचराः सूर्यादिदीप्तांशकाः” नील०ता० र१५। च१२। म८। बु७। वृ९ शु७।श९। सूर्यादेः एतदंशमध्यवर्त्तिनि ग्रहान्तरे इत्थशालादियोगः, लिप्ताद्वौ-